आह्वयामाह । अनवस्थितत्वं स्यादनियता
स्थितिः स्यादित्यर्थः । चिकित्साव्यतिरेकेणापि
निवृत्तिः । तथानवस्थितत्वं सगौरवं स्यात् ।
गौरवमप्यनवस्थितं स्यात् । अथ च सोत्सेधं
स्यात् । उन्नतत्वमप्यनवस्थितं स्यादित्यर्थः ॥*॥
वातिकं शोथमाह ।

"चरस्तनुस्त्वक्परुषोऽरुणोऽसितः
प्रसुप्तिहर्षार्त्तियुतो निमित्ततः ।
प्रशाम्यति प्रोन्नमेति पीडितो
दिवा बली स्यात् श्वयथुः समीरणात् ॥"

चरः सञ्चारी । प्रसुप्तिः स्पर्शाज्ञता । हर्षोऽत्र
झिनिझिनी रोमाञ्चो वा । अर्त्तिः पीड़ा ।
एतद्युतः । दिवाबलीविकृतिविषमसमवाया-
रम्भात् । अतएवोक्तं चरकेण ।
"स्नेहोपमर्दनाद्यैर्यः प्रशाम्येत् स च वातिकः ।
यश्चाप्यरुणवर्णः स्यात् शोथो नक्तं प्रशा-
म्यति ॥" * ॥
पैत्तिकमाह ।

"मृदुः सगन्धोऽसितपीतरागवान्
भ्रमज्वरस्वेदतृषामदान्वितः ।
य उष्यते स्पर्शरुगक्षिरागकृत्
स पित्तशोथो भृशदाहपाकवान् ॥"

उष्यते सन्तप्यते । भृशदाहपाकवान् भृश-
दाहो यः पाकस्तद्युक्तः ॥ * ॥ श्लैष्मिकमाह ।

"गुरुः स्थिरः पाण्डुररोचकान्वितः
प्रसेकनिद्रावमिवह्निमान्द्यकृत् ।
स कृच्छ्रजन्मप्रशमो निपीड़ितो
न चोन्नमेद्रात्रिबलीकफात्मकः ॥"*॥

द्वन्द्वजमाह ।
"निदानाकृतिसंसर्गात् श्रेयः शोथो द्विदोषजः॥
सान्निपातिकमाह ।
"सर्वाकृतिः सन्निपाताच्छोथो व्यामिश्रलक्षणः
व्यामिश्रलक्षण इत्युक्ते सर्व्वाकृतिरिति उक्त-
वातजादिशोथसकललक्षणनियमार्थम् ॥ * ॥
अभिघातजमाह ।
"अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः ।
हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः ॥
रसैः शूकैश्च संस्पर्शात् श्वयथुः स्याद्विसर्पवान् ।
भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः ॥"
छेदः खड्गादिना भेदः पाषाणादिना क्षतं
शरादिना नाड़ीव्रणादि च । आदिशब्देन
लगुड़प्रहारादि गृह्यते । भल्लातजैः रसैः । कपि-
कच्छुजैः शूकैः । विसर्पवान् प्रसरणशीलः ।
पित्तलक्षणः पैत्तिकशोथलक्षणश्च ॥*॥ विषज-
माह ।
"विषजः सविषप्राणिपरिसर्पणमूत्रणात् ।
दंष्ट्रादन्तनखाघातादविषप्राणिनामपि ॥
विण्मूत्रशुक्रोपहतमलवद्वस्त्रसंकटात् ।
विषवृक्षानिलस्पर्शात् गरयोगावचूर्णनात् ॥
मृदुश्चलोऽवलम्बी च शीघ्रो दाहरुजाकरः ।"
परिसर्पणं शरीरोपरि सञ्चरणम् । दंष्ट्राद्विगुणो
क्षता दन्तावली । चोँ ह इति लोके । दन्ता
अग्रे भवाः । अविषप्राणिनामपीत्यनेन दंष्ट्रा
दन्तनखानां स्वभावादेव सविषत्वमुक्तम् । किन्तु
सर्पादिविषं मारकं भवति । अविषप्राणिनां
दंष्ट्रादिविषं शोथव्यथादिकरं भवतीति विशेषः
विण्मूत्रेत्यादिविड़ाद्युपहतं मलिनञ्च यद्वस्त्रम
तथा सङ्करः संमार्जनीनिःक्षिप्तो धूल्यादिः तेषां
सम्पर्कात् । गरयोगावचूर्णनात् गरः संयोगजं
विषं तस्य योगो यस्य तेन वस्तुनावधूननात् ।
अवलम्बी लम्बमानः । अयमप्यागन्तुजस्तथापि
सामान्यागन्तुजशोथचिकित्सातोऽस्य विशिष्ट-
चिकित्साभिधानात् पृथक् पठितः ॥ * ॥
यत्र स्थिता दोषा यत्र शोथं कुर्व्वन्ति तदाह ।
"दोषाः श्वयथुमूर्द्ध्वं हि कुर्वन्त्यामाशये स्थिताः।
पित्ताशयस्था मध्ये तु वर्च्चःस्थानगतास्त्वधः ॥
कृत्स्नं देहमनुप्राप्ताः कुर्युः सर्व्वसरं तथा ।"
ऊर्द्ध्वं उरःप्रभृत्यूर्द्ध्वम् । मध्ये पक्वाशयमध्ये । अधः
पक्वाशयादधः ॥*॥ उपद्रवानाह ।
"श्वासं पिपासा छर्द्दिश्च दौर्बल्यं ज्वर एव च ।
यस्य चान्ने रुचिर्नास्ति शोथिनं तं विवर्जयेत्॥"
कष्टसाध्यत्वादिकमाह ।
"यो मध्यदेशे श्वयथुः स कष्टः सर्व्वगश्च यः ।
अर्द्धाङ्गेऽरिष्टभूतश्च यश्चोर्द्ध्वं परिसर्पति ॥"
मध्यदेशे उरःपक्वाशयमध्ये । सर्व्वगः सकल-
शरीरभवः । सर्व्वज इति पाठे सान्निपातिकः।
अर्द्धाङ्गे अर्द्धनारीश्वराकारे । यश्चोर्द्ध्वं परिसर्प-
तीति पुरुषविषयम् । तथा च ।
"ऊर्द्ध्वगामी नरं हन्त्यधोगामी मुखात्
स्त्रियम् ।
उभयं वस्तिसंजातः शोथो हन्ति न संशयः॥"
ऊर्द्ध्वगामी मुखगामी । तथा च तन्त्रान्तरे ।
"पादप्रवृत्तः श्वयथुर्नृणां यः प्राप्नुयान्मुखम् ॥"
इति ॥ स न सिध्यतीति शेषः । अधोगामी
पादगामी । तथा च तन्त्रान्तरे ।
"स्त्रीणां वक्त्रात् पदं याति वस्तिजश्च न
सिध्यति ।" इति ॥
उभयं नरं नारीञ्च । अपरञ्च ।
"अनन्योपद्रवकृतः शोथः पादसमुत्थितः ।
पुरुषं हन्ति वा नारीं मुखजो वस्तिजो द्वयम्॥"
अयमर्थः । पादसमुत्थितः पादाभ्यामुत्थितो
मुखगामीति यावत् शोथः पुरुषं हन्ति स किं
विशिष्टः अनन्योपद्रवकृतः । शोफादन्ये व्याधयो
ऽतीसारग्रहणीश्वासप्रभृतयः तैरुपद्रवैः कृतः ।
तदुपद्रवैश्च जात इत्यर्थः । न अन्योपद्रवकृतः ।
अनन्योपद्रवकृतः । अर्थात् स्वहेतुभिरेव जातः।
शोथव्याधिरेव तु पुनर्मुखजः मुखाज्जातः पद-
गामीति यावत् नारीं हन्ति । सोऽप्यनन्योप-
द्रवकृत एव । वस्तिजः द्वयं पुरुषं नारीञ्च हन्ति
सोऽप्यनन्योपद्रवकृत एव ॥*॥ अथ शोथस्य
चिकित्सा ।
"शुण्ठीपुनर्नवैरण्डपञ्चमूलीशृतं जलम् ।
वातिके श्वयथौ शस्तं पानाहारपरिग्रहे ॥*॥
पटोलत्रिफलारिष्टदार्व्वीक्वाथः सगुग्गुलुः ।
हन्ति पित्तकृतं शोथं तृष्णाज्वरसमन्वितम् ॥*॥
स्नुक्क्षीरभाविताः कृष्णा पथ्या मूत्रेण वा युताः
योजिताः शमयन्त्याशु शोथं श्लेष्मसमुत्थितम् ॥
मिश्रे मिश्रक्रियां कुर्यात् सर्व्वजे सर्व्वमेव हि।
विल्वपत्ररसं पूतं शोषणं त्रिभवे पिबेत् ।*॥
शोथे त्वागन्तुजे कुर्यात् सेकलेपादिशीतलम्।
भल्लातकस्य हरेच्छोथं सतिला कृष्णमृत्तिका ।
महिषी नवनीतञ्च लेपाद्दुग्धतिलान्वितम् ॥"
अत्र दुग्धं महिष्या एव । यत आह ।
"महिषीक्षीरसंपिष्टैर्नवनीतसमन्वितैः ।
तिलैर्लिप्तः समं याति शोथो भल्लातकोत्थितः ॥
यष्टिदुग्धतिलैर्लेपो नवनीतेन संयुतः ।
शोथमारुष्करं हन्ति चूर्णैः शालदलस्य च ॥"
विषजशोथचिकित्सा तु विषचिकित्सायां द्रष्टव्या
अथ सामान्यचिकित्सा ।

"पथ्या निशा भार्ग्यमृताग्निदार्व्वी-
पुनर्नवा दारु महौषधञ्च ।
क्वाथं प्रपीयोदरपाणिपाद-
मुखाश्रितं हन्त्यचिरेण शोथम् ॥"

इति पथ्यादिक्वाथः ॥*॥
फलत्रिकोद्भवं क्वाथं गोमूत्रेणैव साधयेत् ।
वातश्लेष्मभवं शोथं हन्याद्द्वन्द्वजसम्भवम् ॥*॥

वृषीवदेवद्रुमनागरैश्च
दन्ती त्रिवृद्व्योषणचूर्णकैर्वा ।
दुग्धं सुसिद्धं विधिना निपीतं
शीतं परं शोथहरं भिषग्भिः ॥"

वृषीवः वर्षाभूः ॥*॥
"केशराजार्कवर्षाभूर्निम्बक्वाथेन शोथहृत् ।
गोमूत्रेणापि कुर्व्वीत सुखोष्णे नावसेचनम् ॥*॥
पुनर्नवा दारु शुण्ठी शिग्रुः सिद्धार्थकस्तथा ।
अम्लपिष्टः सुखोष्णोऽयं प्रलेपः सर्व्वशोथहृत् ॥

गुड़ार्द्रकं वा गुड़नागरं वा
गुड़ाभयां वा गुड़पिप्पलीं वा
कर्षाभिवृद्ध्या त्रिपलप्रमाणं
खादेन्नरः पक्षमथापि मासम् ॥
शोथप्रतिश्यायगलास्यरोगान्
सश्वासकासारुचिपीनसादीन् ।
जीर्णज्वरार्शोग्रहणीविकारान्
हन्यात् तथान्यान् कफवातरोगान् ॥*॥

त्रिवृतं गुड़ेन तुल्यं वृषीवरसानुपानमभ्यस्तम् ।
विनिहन्ति सर्व्वशोथं घनवृन्दं चण्डवायुरिव॥*॥
कणानागरजं चूर्णं सगुड़ं शोथनाशनम् ।
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनम्॥*॥
गुड़ात् पलत्रयं ग्राह्यं शृङ्गवेरं पलत्रयम् ।
शृङ्गवेरसमा कृष्णा लोहविट्तिलयोः पलम् ॥
चूर्णमेतत् समुद्दिष्टं सर्व्वश्वयथुनाशनम् ॥"
इति गुड़ादिवटिका ॥
"मानककाथकल्काभ्यां घृतप्रस्थं विपाचयेत् ।
एककं द्वन्द्वजं शोथं त्रिदोषञ्च व्यपोहति ॥"
इति मानकघृतम् ॥
"शुष्कमूलकवर्षाभूदारुरास्नामहौषधैः ।
पक्वमभ्यञ्जनात्तैलं सशूलं श्वयथुं हरेत् ॥"